लम्, अग्नये वैश्वानराय द्वादशकपालं पुरोडाशम् ५ । स यदग्नये पथिकृते निर्वपति । अग्निर्वै पथः कर्त्ता स यस्मादेवादो यजमानो यज्ञपथादेति तमेनमग्निः पन्थानमापादयति ६ । अथ यदिन्द्राय वृत्रघ्ने । पाप्मा वै वृत्रो यो भूतेर्वारयित्वा तिष्ठति कल्याणकर्म्मणः साधोस्तमेतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रं हन्ति तस्मादिन्द्राय वृत्रघ्ने ७ । अथ यदग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति यत्र वा इन्द्रो वृत्रमहंस्तमग्निना वैश्वानरेण समदहत्तदस्य सर्वं पाप्मानं समदहत्तथोएवैष एतदिन्द्रेणैव वृत्रघ्ना पाप्मानं वृत्रं हत्वा तमग्निना वैश्वानरेण संदहति तदस्य सर्वं पाप्मानं संदहति स यो हैवं विद्वानेतयेष्ट्या यजते न हास्याल्पश्चन पाप्मा परिशिष्यते ८ । तस्यै सप्तदश सामिधेन्यो भवन्ति । उपांशु देवता यजति याः कामयते ता याज्यानुवाक्याः करोत्येवमाज्यभागावेवं संयाज्ये ९ । तिसृधन्वं दक्षिणां ददाति । धन्वना वै श्वानं बाधन्ते तदेतमेवैतद्बाधते यत्तिसृधन्वं दक्षिणां ददाति १० । दण्डं दक्षिणां ददाति । दण्डेन वै श्वानं बाधन्ते तदेतमेवैतद्बाधते यद्दण्डं दक्षिणां ददात्येषा ऽन्वादिष्टा दक्षिणा दद्यात्त्वेवास्यामप्यन्यद्याइतरा दक्षिणास्तासां यत् सम्पद्येत सा सा हैषा पशव्येष्टिस्तयाप्यनभ्युद्दृष्टो यजेतैव" ४ क० । "दर्शयागे पुरस्ताच्चन्द्रदर्शनप्रायश्चित्तेष्टिरुक्ता अथ पश्चात्तद्दर्शने नैमित्तिकीमिष्टिं विधित्सुराह । अथानन्तरं सायंकाले एष चन्द्रमाः पश्चात् प्रतीच्यां दिशि ददृशे दृश्यते । अभ्यवेक्षते अभ्यवहर्त्तुं पश्यति यथा शालावृको वने संचरतो मेषादीन् पशूनभ्यवजिहीर्षति । एतस्मादेव खलु चन्द्रसम्बन्धिस्वरूपेण पूर्वोक्तवत् अकारः समासान्तः तस्माच्चन्द्रादिति भीषा उक्तरूपया भीत्या, छायामुपगच्छन्ति गवाद्याः पशवः तिरोहिता यजमानस्य भवन्तीत्यर्थः पशूनामुपतापकारि यदेतच्चन्द्रदर्शनं तत् खलु चितं शुना रिक्तीकृतमित्याचक्षते २ । एतमेव चन्द्रगतं दोषमेवमाचक्षते, चन्द्रमसः सम्बन्धी तन्मण्डलमध्यवर्त्ती शश इति अत एव तस्य शशाङ्क इति प्रसिद्धिः । उपवसथकाष्ठांगतं देशानुरूपं चन्द्रमसं पौर्णमासीकाले द्रवीकुर्वन्ति । पशव ओषधीर्जग्ध्वा अपश्च पीत्वात्मनि तं चान्द्रमसं कृत्स्नं रसममावास्यायां धारयन्ति तत एनं रसममावास्यासम्बन्धिन्यां रात्रौ पशुभ्यः सकाशात् संनयति सम्यक्प्रापयति । तत्संनयनं प्रतिपच्चन्द्रदर्शने सति नोपपद्यते । ३दर्शयागस्यातिक्रान्तकालत्वे दोषसम्पन्नस्य तन्त्रानुष्ठानप्रकारमाह । प्रकृतो दर्शयागः शीघ्रं समापनीयः अनन्तरमेवैतद्दोषपरिहाराय प्रायश्चित्तेष्टिः कर्त्तव्या । स आमावास्यविधेनैवेति यथोदितकालेऽनुष्ठितोऽमावास्यायागस्तत्प्रकारेणैव प्रतिपदि प्रक्रान्तां दर्शेष्टिं समाप्य४ । अथास्यामिष्टौ प्रकृतिवद्विकृतिः कर्त्तव्येति नोदकप्राप्तेष्वङ्गेषु विशेषं विधत्ते । प्रकृतौ पञ्चदश अत्र नोदकप्राप्तास्ताः पृथुवाजवत्यौ धाय्ये द्वे इति सप्तदश (सामिधान्यः) भवन्ति । प्रकृतौ प्रधानयागे उच्चैर्धर्मः । प्रकृतदेवतालिङ्गयुक्तास्ततःषष्ठ्यां दाशतय्यां समाम्नाता या ऋचताः कामयते । आज्यभागयोः स्विष्टकृद्यागे च याथाकाम्यम् ९ । तिसृभिरिषुभिर्युक्तं धनुः तिसृधन्वम् पूर्ववदकारः समासान्तः । एतं चन्द्रात्मकं दिव्यं श्वानम् १० । अदृश्यमानचन्द्रे ऽ,ऽपि" ११ भा० "इष्टीः पार्वायणान्तीयाः केवला निर्वपेत् सदा" मनुः "प्राजापत्यां निरूप्येष्टिम्" । "हेमन्ते नवशस्येष्ट्या" मनुः "आरेभिरे जितात्मानः पुत्रीयामिष्टिमृत्विजः" रघुः । २"यागमात्रे च "कर्त्तुमिष्टिमभिवाञ्छता मया" माघः राजसूययागाभिप्रायमिदम् । इष-क्तिन् । ३इच्छायाम् । इष्टप्रयोगनिर्वाहाय पातञ्जलभाष्यकृतः इच्छाबोधके ४श्लोकाद्यात्मकवाक्यभेदे च । यथा । "द्विपर्य्यन्तानामेवेष्टिः" सर्वनाम्नोवृत्तिमात्रे पुंवद्भाव" इत्यादि । एतयेष्ट्या "ठक्छसोश्च" वार्त्ति० "एकतद्धिते चेति" सूत्रञ्च गतार्थम्' सि० कौ० । "अनुत्सूत्रपदन्यासेति" माघव्याख्यायाम् अनुत्सृष्टसूत्राक्षरा इष्ट्युपसंख्याननैरपेक्ष्येण सूत्राक्षरैरेव" इति मल्लि० ।

**इष्टिका** स्त्री इष-तिकन् । इष्टकाशब्दार्थे "उद्वर्त्तनं त्विष्टिकया कण्डुकोठविनाशनम्" सुश्रु० । "इष्टिका काञ्चनी चात्र चयनार्थं कृताऽभवत्" भा० आश्व० ८८अ० ।

**इष्टिकापथिक** न० इष्टिकायाः पथिकं तदुद्देशेनापि प्रभवत्वात् । नामञ्जकतृणे राजनि० । [ कृतयागे ।

**इष्टिकृत्** त्रि० इष्टिं यागं कृतवान् कृ-भूते क्विप् ६त० ।

**इष्टिन्** त्रि० इष्टमनेन इष्टा० इनि । कृतयागे "अध्वरेष्विष्टिनां पाता" भट्टिः ।

**इष्टिपच** पु० इष्टये इच्छायै अभिलाषार्थं पचति न यज्ञार्थं पच-अच्- ४त० । १ कृपणे २ दैत्ये च शब्दर० । स हि स्वेच्छापूरणार्थमेव पचति न यज्ञार्थमिति तस्य तथात्वम् ।

**इष्टिपशु** पु० ६त० । यज्ञिये पशौ । त्रिका० ।

**इष्टिमुष्** त्रि० इष्टिं यागं मुष्णाति मुष-क्विप् ६त० । दैत्ये

**इष्टियायजूक** पु० इष्ट्या यायजूकः । "काम्येष्टियजनशीले । "तस्मान्नेष्टियाजूकः स्यात् पशुभ्यः एकं प्रायच्छत्" इ० उ० ।